SET-02

# केन्द्रीय विद्यालय संगठनम् पटना सम्भाग:

## संकलनात्मकं मूल्यांकनम् II ( SA- 2 ) 2015-16

कक्षा - नवमी                                        अवधि: -- होरात्रयम्

विषय:-संस्कृतम्                                      पूर्णाङ्का: - 90

निर्देशा : -

**अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति ।**

खण्ड :- क    अपठित-अवबोधनम्    -    10 अंका:

खण्ड- : ख    रचनात्मक-कार्यम्    -    15 अंका:

खण्ड- : ग    अनुप्रयुक्त-व्याकरणम्    -    30 अंका:

खण्ड :– घ    पठित-अवबोधनम्    -    35 अंका:

समस्ता :प्रश्ना :अनिवार्यासन्ति । :

प्रतिखण्डम् उत्तराणि उत्तरपुस्तिकायाम् क्रमेणैव एव लेखनीयानि ।

अन्यत्र कुत्रापि लिखितेभ्यन प्रदास्यन्ते :अङ्का :उत्तरेभ्य :|

## <u>खण्ड: ‘ क ’ अपठित- अवबोधनम् -</u>    10 अङ्का :

**प्र.1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत -**

भारतवर्षे षट् ऋतव: भवन्ति । तेषु वसन्त: ऋतुराज : कथ्यते । चैत्रे वैशाखे च मासे वसन्तस्य ऋतु: भवति । वसन्ते द्वौ प्रमुखौ उत्सवौ भवत: - वसन्तोत्सव: , होलिकोत्सव: च । वसन्तोत्सवे सर्वत्र प्रमादो भवति । नरा: नार्य: च सर्वत्र गायन्ति,नृत्यन्ति च । होलिकोत्सव: फाल्गुनमासस्य पूर्णिमायाम् भवति । हर्षातिरेकेण नरा: नार्य: युवान: वृद्धा: बालका: च प्रसन्ना: जायन्ते । जना: परस्परं रक्तवर्णं रक्तचूर्णं च प्रक्षिपन्ति ।द्वेषं विस्मृत्य सर्वे परस्परं मिलन्ति । रात्रौ जना: परस्परम् आमन्त्र्य प्रीतिभोजं कृत्वा आमोदं मानयन्ति । वार्तालापस्य माध्यमेन सर्वे जना: कण्ठेन मिलित्वा स्वजीवनं सुखमयं मानयन्ति ।

**(क ). एकपदेन उत्तरत्त -**    **1 x 2 = 2**

( i ) भारते कति ऋतव: भवन्ति ?

( ii ) कदा सर्वत्र प्रमादो भवति ?

**( ख) . पूर्णवाक्येन उत्तरत -**    **2 x 2 = 4**

(i ) होलिकोत्सवे नरा: नार्य: किं कुर्वन्ति

( ii) वार्तालापस्य माध्यमेन सर्वे जना: किं कुर्वन्ति ?

**(ग) भाषिक कार्यम् --------------**    **1 x 2 = 2**

( 1 ) ‘ प्रक्षिपन्ति ’ इति क्रियाया: कर्तृपदम् किम् ?

( i ) जना:    (ii) बालका:    ( iii ) कन्या :    (iv) नार्य:

( 2 ) भारतवर्षे षट् ऋतव: भवन्ति । अत्र क्रियापदं किम् ?

(i )षट्    (ii ) भवन्ति    ( iii ) ऋतव:    (iv ) भारते

**( घ )** अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत ?    2

## खण्ड: ' ख ' रचनात्मक – कार्यम् - 15 अङ्का:

**प्र.2. भवतः नाम रमेश:। भवान् सहपाठिभि: सह देहरादूनं प्रति शैक्षिकयात्रायै गंतुमिच्छति। धनप्रेषणार्थम् पितरं प्रति अत्र अधस्तात् मंजूषायां लिखितान् शब्दान् नीत्वा पत्रम् पूरयन् लिखतु । ½ x 10 =5**

**पतंजलि छात्रावास:**

**………………………………**

**दिनांक :7- 12 -20xx**

**परमादरणीया: (ii)---------------------- ।**

**सादरं प्रणमामि ।**

**सविनयं ( iii ) ------------- यत् मम वार्षिकपरीक्षा समाप्तिम् गता । मम ( iii ) -------------- शोभना जाता । अस्मिन् ( v) ----------- अहं गृहं न आगमिष्यामि ,**

**यतः विद्यालयेन एकस्या: ( vi ) ------------ प्रबंध: कृत: । अत्र वयम् आई . एम . आई. इति सैनिकप्रशिक्षण केन्द्रं अपि द्रक्ष्यामः । संभवत: ' मंसूरी' पर्वतप्रदेशम् अपि गमिष्यामः । अतः यात्राव्ययार्थं ( vii ) ------------------------------ रुप्यकाणि प्रेषयन्तु भवन्तः । अहम् तत्र गमनाय ( viii) ----------------------- अस्मि । गृहे ( ix ) -----------**

**नमो नमः ।**

**भवदीयः**

**( x ) -------------**

**रमेश:**

**मञ्जूषा**

| |
|---|
| **सर्वेभ्यः, परीक्षा ,पञ्चशतम् , अवकाशे , कोलकातातः , निवेदयामि, उत्सुकः , पितृमहाभागाः, शिक्षणयात्राया: , अभिन्नहृदय: ।** |

3. निम्नचित्रं दृष्ट्वा मञ्जूषाया: शब्दानां सहायतया संस्कृते पञ्च वाक्यानि लिखत ---- (2 x 5=10 )

मञ्जूषा ---(कराटे , प्रतियोगिता , छात्रौ , प्रदर्शनम् , छात्रा: , कन्या: , बालका:, प्रसीदन्ति , क्रीडास्थले , अध्यापिका ।)



**अथवा**

**मञ्जूषाया: प्रदत्तपदानां साहाय्येन ' वृक्षस्य महत्वम्' विषये संस्कृते पञ्च वाक्यानि लिखत --- ( 2 x 5=10 )**

**मञ्जूषा ----------** दृश्यते, वृक्षस्य , जीवनं , अस्माकम् , आगच्छन्ति , पर्यावरणार्थम् , विक्रीय ,मया ,वृक्षारोपणं ,प्राणान् ।

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

## <u>खंड: ग - 'अनुप्रयुक्त -व्याकरणम्'</u> 30 अंका :

**प्र.4.(अ) रेखांकितपदे विभक्ति: लिखत ?** 1x2 = 2 .

1. धिक् <u>देशद्रोहिणम्</u> यः देशे न स्निहयति ।

(i) सप्तमी (ii) द्वितीया (iii) षष्ठी (iv) चतुर्थी

2。 <u>विद्वांस:</u> सद्व्यवहारमेव प्रशंसन्ति |

(i) प्रथमा (ii) द्वितीया (iii) तृतीया (iv) षष्ठी

(आ) अधोप्रदतशब्दस्य समुचितरूपेण रिक्तस्थानानि पूरयत- ½ x 8=4

1。 प्रजापालनमेव ------------- धर्म: ।

(i) राजानाम् (ii) राज्ञाम् (iii) राजाम् (iv) राजा

2. अत्र......................... कदा आगतः ?

(i) भवान् (ii) भवन्तौ (iii) भवन्त: (iv) भवता

3. तस्य ....................... कलुषित: वर्तते |

(i) आत्मा (ii) आत्मनौ (iii) आत्मन: (iv) आत्मना

4. वनेषु ....................... किमर्थम् तपन्ति ?

(i) भवन्तौ (ii)भवन्त: (iii) भवत: (iv) भवता

5. किं ........................ नाम श्यामः: वर्तते ?

(i) भवत: (ii) भवतस्य (iii) भवत्या: (iv) भवताम्

6. .......................... सेवा जीवनवर्धिका भवति |

(i) राज्ञा (ii) राज्ञ: (iii) राज्ञाम् (iv) राजा

7.................... मनः तु मम अधीनम् ।

(i) भवतः (ii) भवान् (iii) भवता (iv) भवनतम्

8. -------------------- नरं पश्य ।

(i) गच्छत् (ii) गच्छन् (iii )गच्छता (iv) गच्छन्तम्

**प्र.5。 (अ) . रेखांकितपदे का विभक्ति:किं च वचनम् ?** 1 X 2 =2

1. तत्र <u>तिस्त्र:</u> महिला: गीतं गायन्ति ।

(i) द्वितीया एकवचन (ii) प्रथमा बहुवचन (iii) षष्ठी द्विवचन (iv)सप्तमी एकवचन

2. एतस्मिन् उद्याने <u>चत्वार:</u> वृक्षा: अपतन् ।

(i) प्रथमा बहुवचन (ii)तृतीया एकवचन (iii)द्वितीया एकवचन (iv)चतुर्थी बहुवचन

(आ) . अधोलिखितवाक्ये रिक्तस्थाने किं पदं भविष्यति ? 1 X 4 = 4

1. यूयम कक्षायां ...................... आम्राणि वितरत ।

(i)पञ्च (ii)पञ्चानि (iii)पञ्चा: (iv)पञ्च:

2. ..................... नदीषु गङ्गा सर्वश्रेष्ठा ।

(i)चतुर्षु (ii)चत्वारिषु (iii)चतसृषु (iv)चत्सृसु

3. मम पार्श्वे ..................... कलमे स्त: ।

(i)द्वि (ii)द्वे (iii)द्व्यो: (iv)द्वौ

4. .................... बालके सर्वे गुणा: सन्ति ।

(i)एके (ii)एकस्मिन् (iii)एकस्यां (iv)एक:

**प्र.6. (अ) अधोलिखितवाक्येषु कोष्ठके प्रदत्तधातूनां लोट् लकारे किं समुचितं पदं भविष्यति ? 1x3 = 3**

1. अद्य भवान् मम गृहे भोजनं ---------- । (कृ)

(i) कुरुत (ii)कुरु (iii)कुर्यात् (iv) कुर्याम्

2. यूयम् पञ्चविद्यानाम् नामानि ...................... । (वद्)

(i)वदतु (ii)वदत (iii)वदताम् (iv) वदेत

3. ते राज्यं ...................... । (पाल्)

(i)पालयन्तु (ii)पालयेयु: (iii)पालयन्ति (iv) पाल्यताम्

(आ) अधोलिखितवाक्येषु कोष्ठके प्रदत्तधातूनां विधिलिङ्ग लकारे किं समुचितं पदं भविष्यति ? 1x3 = 3

1. युवां सद्गुरूम् प्रश्नं ------------------ ।(पृच्छ)

(i) पृच्छेत् (ii) पृच्छेताम् (iii) पृच्छेतम् (iv) पृच्छेयु:

2. आवाम् किं ............................ ? (कृ)

(i)कुर्याम (ii)कुर्याव (iii)कुर्येव (iv)कुर्यु:

3. यूयं असत्यं न ....................... । (वद)

(i)वदेम (ii)वदेयु: (iii)वदेत (iv)वदेव

**प्र.7. 1. अधोलिखितवाक्येषु रिक्तस्थानानि समुचितपदै: पूरयत - 1 x 3 =3**

1. अलम् ------------------ । ( कोलाहल )

(i) कोलाहलं (ii) कोलाहलेन (iii) कोलहल: (iv)कोलाहलस्य

2. अहम् ..................... सह आपणम् गच्छामि । (जननी)

(i)जनन्या (ii)जननीम् (iii)जनन्या: (iv)जनन्य

3. संसारे ........... विना न ज्ञानम् । (गुरु )

(i) गुरुणा (ii) गुरुम् (iii) गुरवे (iv) गुरो:

2. अधोलिखितेषु अनुच्छेदे मंजूषायां प्रदत्तशब्दै: रिक्तस्थानानि पूरयत -1/2 x 6=3

(i)............................ आश्रमे अनेके (ii).................... भवन्ति तत्र अनेके बटव: सन्ति ते परस्परं (iii)....................... इव आचरन्ति ते प्रात:काले (iv)........................अर्घ्यम् यच्छन्ति हवनं कुर्वन्ति तत्पश्चात्

(v)..............संलग्ना: भवन्ति । (vi)....................... परित: गहनं वनम् अस्ति ।

मञ्जूषा --- सूर्याय,बान्धव:,जन्तव:,मुने:,स्वाध्याये,आश्रमम्

**प्र.8. 1. धातु + क्त/क्तवतु प्रत्यययोगेन निर्मितम् उचितं पदं चित्वा लिखत -- -1x3=3**

1. मोहनः पत्रम् ------------------ ।

(i) लिखितवन्तम् (ii) लिखितवान् (iii) लिखित्वत् (iv) लिखितम्

2. पुस्तकं पठन् बालक: ............................... ।

(i)हसितवत् (ii)हसितम् (iii)हसितवान् (iv)हसित:

3. मया चलचित्रम्......................... ।

(i)दृष्टम् (ii) दृष्ट: (iii) दृष्ट्वा (iv) दृश्य:

2. निर्दिष्टधातु - प्रत्यययोगेन वाक्यपूर्तिम् कुरुत - 1x3=3

1. ...................... बालक: पुस्तकमपि पठति । (खाद् + शतृ)
2. सैनिक: चौरं ............................. । (निंद् + क्तवतु)
3. ............................ बालक : अत्र आगच्छत् । (सेव् + शानच्)

## खण्ड: घ – 'पठित - अवबोधनम्' 35 अङ्का:

**प्र. 9. निम्नलिखितं गद्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायाम् लिखत– 5**

बाल: अष्टावक्र: मित्रै: सह क्रीडित्वा गृहम् प्रत्यावृत्त: | स: जननीम् अपृच्छत्–मात: क्व आस्ते मम पिता इति | सा अवदत्-" जात ! तव पिता राजर्षे: जनकस्य सभां विद्वद्भि: सह शास्त्रार्थाय गत: आसीत् | किन्तु अधुना यावत् न निवृत्त: | अहमपि चिन्तातुरा अस्मि |" इदं निशम्य अष्टावक्र: प्रत्यवदत्,"जननि ! अलं चिन्तया | श्व: प्रभाते एव अहम् राजसभां गत्वा ज्ञास्यामि का वार्ता इति |"

I. एकपदेन उत्तरत – 1 x 2 = 2

1. अष्टावक्र: कै: सह क्रीडित्वा गृहं प्रत्यावृत्त: ?

(i) पित्रा (ii) जनन्या (iii) मित्रै : (iv) तेन

2. अष्टावक्र: कुत्र गन्तुम् इच्छति स्म?

(i) राजर्षिम् (ii) राजसभाम् (iii) ग्राम् (iv) गृहम्

II. पूर्णवाक्येन उत्तरत– 2 x 1 = 2

अष्टावक्र: कुत्र गत्वा वार्ताम् ज्ञास्यति?

III. भाषिककार्यम्– ½ x 2 = 1

'राजर्षे:' इति पदस्य विशेष्यम् किम्?

(i) जनकस्य (ii) सभा (iii) विदुष: (iv) राजसभाम्

2. 'ज्ञास्यामि' इति क्रियापदस्य कर्तृपदम किम्?

**प्र. 10. निम्नलिखितं पद्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायाम् लिखत– 5**

" छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे |
फलान्यपि परार्थाय वृक्षा: सत्पुरुषा इव ||"

I.एकपदेन उत्तरत - 1 x2 =2

1.वृक्षा: स्वयं कुत्र तिष्ठन्ति ?

(i) गृहे (ii) उद्याने (iii)आतपे (iv) रणे

2.वृक्षा: अन्यस्य किं कुर्वन्ति ?

(i) फलानि (ii) आतपे (iii) छायाम् (jv) एव

II.पूर्णवाक्येन उत्तरत – 2 x 1 = 2

वृक्षा: परार्थाय किं किं कुर्वन्ति ?

III.भाषिककार्यम् -- 1/2 x 2 = 1

1. 'कुर्वन्ति' इत्यस्य पदस्य कर्तृपदम किम ?

(i)पुरुषा: (ii) वृक्षा: (iii) छाया (iv) अन्या

2.'स्वार्थाय" अस्य पदस्य विलोमपदम् श्लोके प्रयुक्तम् अस्ति ।

(i) फलानि (ii) छाया (iii)परार्थाय (iv) अन्यस्य

**प्र. 11. निम्नलिखितं नाट्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि उत्तरपुस्तिकायाम् लिखत– 5**

नगरपाल: -- (तन्तुवायं प्रति) भो: ! किमेतत् करोषि ?

तन्तुवाय: -- महाशय ! अहं त्रुटितान् तंतून् संयोजयामि ।

नगरपाल: -- किं पठित: असि ?

तन्तुवाय: -- आम् , मया गुरुकुले शिक्षा गृहीता ।

नगरपाल: -- किं काव्यरचनां जानासि ?

तन्तुवाय: -- पश्यतु एव भवान् । तन्तुसंयोजने व्यग्र: अहं कथं काव्यं कुर्याम् ?

नगरपाल: -- तर्हि त्वया मया सह राजसभां गन्तव्यम् ।

तन्तुवाय: -- प्रसीदतु भवान् ! तत्र गत्वा किं करिष्यामि ? दयस्व , मयि दयस्व ।
तत्र गमनेन मम कार्यहानि: भविष्यति ।

I.एकपदेन उत्तरत- 1 x 2= 2

1. 'त्रुटितान् तन्तून्' कः संयोजयति स्म ?

(i) नगरपाल: (ii) तन्तुवायः (iii) नृप: (iv) लक्ष्मीधर:

2.गुरुकुले कः शिक्षाम् गृहीतवान् ?

(i) नृप: (ii) नगरपालक: (iii) कवि: (iv) तन्तुवायः

II. पूर्णवाक्येन उत्तरत -- 2 x 1=2

तन्तुवायः राजसभां गन्तुम् कथं न इच्छति ?

III.भाषिककार्यम् -- ½ X 2 = 1

1. 'आगमनेन ' अस्य पदस्य विलोमपदं अत्र प्रयुक्तम् ?

( i ) गत्वा (ii) गमनेन (iii) भवान् (iv) तन्तु

2. तन्तुसंयोजने व्यग्रोऽहं कथं काव्यं कुर्याम ? अत्र 'कुर्याम्' पदस्य कर्त्तरिपदं किम्?

( i ) व्यग्र: (ii) काव्यं (iii) अहम् (iv) त्वम्

**प्र. 12. निम्नलिखितपद्यद्वयस्य अन्वय: मञ्जूषात: पदानि चित्वा पुनः लिखत - 5 .**

1.॰ "स्नेहं ददाति यो मह्यं नित्यं तस्मै ददाम्यहम् ।
ज्योति: पदार्थज्ञानार्थ कोऽहं वदतु साम्प्रतम् ॥ " 1/2 x 5 = 21/2

अन्वय: --- यः (i) ................. स्नेहं ददाति, (ii) ..................... तस्मै
नित्यं (iii) ..................... ज्योतिः ददामि, (iv) ......................... वदतु
(v).................... कः ?

मञ्जूषा –( पदार्थज्ञानार्थम् , अहम् , महयम् , साम्प्रतम् , अहम् )

2. भारतं वर्तते मे परं सम्बलं
भारतं नित्यमेव स्मरामि प्रियम् ।
भारतेनास्ति मे जीवनं जीवनं
भारतायार्पितं मेऽखिलं चेष्टितम् ।। " ½ x 5 = 21/2

अन्वय: - भारतं मे परं (i ) ------------ वर्तते । ( अहम् ) प्रियम् भारतम् ( ii ) ----------- एव स्मरामि । भारतेन ( एव ) मे (iii) ------ जीवनम् अस्ति । मे ( iv) ----------------- चेष्टितम् ( v ) ----------------- अर्पितम् अस्ति ।

**मञ्जूषा- (भारताय , संबलम् , अखिलं , जीवनं , नित्यम् )**

**प्र.13. रेखांकितपदानि आधृत्य प्रश्ननिर्माणम् कुरुत । 1 x 5 = 5**

1. पंडितानाम् चेष्टितुम् दृष्ट्वा अष्टावक्रः हसितुम् आरभत् ।
2. वृक्षस्य उपरि बलाका आसीत ।
3. तरव: नम्राः भवन्ति ।
4. अहं दन्तै: हीन: शिलाभक्षी।
5. अहंकारेण ज्ञानं नश्यति ।

**प्र. 14 .निम्नलिखितानाम् वाक्यानि घटनाक्रमानुसारं पुनःक्रमेण लिखत । ½ x10= 5**

i. तदा मुनिः तां क्रुद्धदृष्ट्या अपश्यत्।
ii. सा विहस्य अवदत् - ' नाहं बलाकेति ' ।
iii. एका बलाका तस्योपरि विष्ठाम् उदसृजत् ।
iv. एतच्छ्रुत्वा मुनि: अतीवविस्मित: जात: ।
v. एकदा महातपा नाम मुनि : तरुच्छायायाम् उपविष्ट: आसीत् ।
vi. पुनः एकदा असौ मुनि: एकां गृहिणीम् भिक्षाम् अयाचत्।
vii. सा बलाका मुने: क्रोधदृष्ट्या भस्माद् अभूत् ।
viii. पतिसेवारता सा अवदत् - " प्रतीक्षस्व क्षणम् ' ।
ix. मुनि: अहंकारमुपगत: ।
x. नाहं बलाका इति तस्या: कथनं श्रुत्वा विस्मित: ।

**प्र.15. रेखांकितपदानां प्रसंगानुसारं उचितं अर्थं प्रदत्तविकल्पेभ्य: चित्वा लिखत । 1 X 5 = 5**

(i) तत् आकर्ण्य मुनि: विस्मित: अभवत् ।
(क) दृष्ट्वा (ख) समीपम् आगत्य
(ग) श्रुत्वा (घ) आगच्छति

(ii) धन्या: महीरूहा: येभ्य: अर्थिन: निराशा: न यान्ति ।
(क) वृक्षा: (ख) महीपति:
(ग) महीपाल: (घ) महीप:

(iii) य: महयं नित्यं स्नेहं ददाति ।
(क) तैलं (ख) प्रेमं
(ग) स्निग्धम् (घ) स्पृहं

(iv) अहं पित्रा सह क्षिप्रम् आगमिष्यामि ।

(क)क्षिप्रा (ख) चिरं

(ग) आदौ (घ) शीघ्रं

(v) भारताय मे <u>अखिलं</u> चेष्टितम् अर्पितम् ।

(क)न्यूनम् (ख) अतिरिक्तम्

(ग) अधिकम् (घ) सम्पूर्णम्

******************************************************************************